दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् वैशाखशुक्लपूर्णिमा
बैशाख 18 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-189 | 1 | मई 01, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 राहुलगाधिनः कार्यकर्तृभ्यः गुरुमन्त्रः- धरातलेन सह जुष्यन्ताम्, जनतायाः स्वरः भवन्तु; श्रेष्ठ- प्रदर्शने पुरस्कारः

3 जातिगत-जनगणनायाः रूपरेखा अद्यापि न स्पष्टा - जयराममरमेशः

5 विश्वशान्त्यै बौद्धधर्मस्य आवश्यकता(पर्वविशेष)

## सुभाषितम्

**न अन्नोदकसमं दानं,**
**न तिथिद्वादशीसमा।**
**न गायत्र्याः परो मन्त्रो,**
**न मातुः परदैवतम्।**

भावार्थः- भूखे और प्यासे लोगों को अन्न और जल के दान के समान अन्य कोई दान नहीं है, द्वादशी के समान पुण्यदायी कोई अन्य तिथि नहीं है। इसी प्रकार गायत्री मन्त्र के समान न कोई और मन्त्र है तथा माता के समान कोई अन्य देवता नहीं हैं।

# हिमाचलप्रदेश-उच्चन्यायालयः 2023 तमवर्षस्य चयनप्रक्रिया-अन्तर्गतं बी.एड. (B.Ed.) अभ्यर्थिनां नियुक्तौ प्रतिबन्धः स्थापितः; यथास्थितिं (Status Quo) रक्षितुम् आदेशः




**शिमला, 30 एप्रिल, 2026**

हिमाचलप्रदेश-उच्चन्यायालयेन गुरुवासरे एकः महत्वपूर्णः निर्णयः पारितः । अनेन आदेशेन राज्यसर्वकारेण वर्ष 2023 इत्यस्य भर्तीप्रक्रियायाः आधारेण बी.एड. (B.Ed.) उत्तीर्ण-अभ्यर्थिभ्यः प्रदीयमानासु नियुक्तिषु प्रतिबन्धः स्थापितः। माननीय-न्यायमूर्ति-जिया-लाल-भारद्वाज-महोदयस्य एकलपीठेन 'प्रवीण कुमार एवं अन्ये विरुद्ध हि.प्र. राज्यम्' (CWP No. 6465/2026) इति प्रकरणस्य श्रवणकाले एषः आदेशः प्रदत्तः ।

**प्रमुखाः अंशाः**-न्यायालयस्य निर्देशः: माननीय-न्यायालयः प्रतिवादिनं (राज्यसर्वकारं) निर्देशितवान् यत् बी.एड. उत्तीर्ण-अभ्यर्थिनां नियुक्ति-प्रक्रियायां आगामी-श्रवण-दिनाङ्कपर्यन्तं 'यथास्थितिः' (Status Quo) पालनीया ।

**प्रकरणस्य पृष्ठभूमिः**- याचिकाकर्तृभिः सूचितं यत् उच्चन्यायालयेन पूर्वमेव 30 दिसम्बर, 2024 दिनाङ्के (हेमन्त शर्मा विरुद्धं हि.प्र. राज्यम् प्रकरणे) तं परिपत्रं (Circular dated 11.10.2023) निरस्तं कृतम् आसीत्, येन इयं प्रक्रिया प्रचलति स्म ।

**विवादस्य कारणम्:** याचिकाकर्तृणां तर्कः अस्ति यत् परिपत्रे निरस्ते सत्यपि, राज्यसर्वकारेण 25 एप्रिल, 2026 दिनाङ्के तस्याः एव प्रक्रियायाः आधारेण परिणामः घोषितः, यत् पूर्णतः अवैधं न्यायविरुद्धं च अस्ति ।

**आगामी-कार्यप्रक्रिया:** न्यायालयेन राज्यसर्वकाराय सूचना (Notice) प्रेषिता तथा च प्रत्युत्तरं दातुं सप्ताहचतुष्टयस्य समयः दत्तः । अस्य प्रकरणस्य आगामी-श्रवणं 28 मे, 2026 दिनाङ्के भविष्यति । अनेन आदेशेन सम्प्रति राज्यसर्वकारः न्यायालयस्य अग्रिमादेशं विना उक्त-प्रक्रियायाः अन्तर्गतं बी.एड. अभ्यर्थिभ्यः नियुक्ति-पत्राणि निर्गन्तुं न शक्नोति ।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारतस्य ब्रिक्स अध्यक्षतायाः प्रथमं संस्कृति-कार्यसमूहस्य उपवेशनं नवदेहल्यां सम्पन्नम्

षड्विंशत्यधिक-द्विसहस्रतम वर्षस्यान्तर्गतं भारतस्य ब्रिक्स अध्यक्षतायाः प्रथमं संस्कृति-कार्यसमूहस्य उपवेशनं नवदेहल्यां सम्पन्नम्। संस्कृति-मन्त्रालयस्य सचिवस्य विवेक-अग्रवालस्य अध्यक्षतायाम् अस्यां सभायां आभासीय माध्यमेन ब्रिक्स देशानां सहभागिता अभवत्। भारतीयप्रतिनिधिसङ्घस्य प्रतिनिधित्वं इन्दिरागान्धी-राष्ट्रियकला-केन्द्रस्य सदस्यसचिवेन डा. सच्चिदानन्दजोशिना अन्यैः अधिकारिभिः च सह कृतम्। सामाजिकान्तर्जालीये-पटले लिखिते सन्देशे संस्कृति-मन्त्रालयेन उक्तं यत् ब्रिक्स इत्यस्य अध्यक्षतायां भारतं संस्कृतौ, जनानां मध्ये आदानप्रदानस्य, सामरिकसहयोगस्य च उपरि बलं प्रददाति


## केन्द्रीय-गृह-मंत्री अमितशाहः सिखधर्मस्य तृतीयगुरुः, गुरु-अमर-दासः इत्यस्य जयन्त्यावसरे देशवासिभ्यः स्वकीयाः शुभकामनाः प्रायच्छत् ।

केन्द्रीय-गृह-मंत्री अमितशाहः सिखधर्मस्य तृतीयगुरुः, गुरु-अमर-दासः इत्यस्य जयन्त्यावसरे देशवासिभ्यः स्वकीयाः शुभकामनाः प्रायच्छत् । एकस्मिन् सञ्जालीयसन्देशे, श्रीशाहः सिखगुरुं संस्मरन् अकथयत् यत् सः त्याग, सेवा, समर्पण, ईश्वरनामस्मरण चेत्यादिमार्गाणाम् अनुसरणं विधातुं प्रेरितम् अकरोत् ।

## रेलमन्त्री अश्विनीवैष्णवः जम्मू-तवी-रेलस्थानकात् श्रीनगर-जम्मू-वंदेभारत् एक्स्प्रेस-रेलयानाय हरितध्वजं प्रदर्शितवान्



रेलमंत्रिणा अश्विनीवैष्णवेन जम्मू-तवी-रेल-स्थात्रात् श्रीनगर-जम्मू-बंदे-भारत-एक्सप्रेस-सेवा इत्यस्य शुभारम्भः हरितध्वजोत्थापनपूर्वकं कृतः । एतत् रेलयानं इतः पूर्वं श्रीनगरात् श्रीमाता-वैष्णो देवी कटरा-स्थानं यावत् प्रचलति स्म तत् अधुना जम्मू-तवी-रेलस्थानं यावत् प्रचलिष्यति । अस्मिन् विस्तीर्णे मार्गे नियमितसेवाः शनिवारात् आरप्स्यते । अवधेयं यत् एतत् रेलयानम् अधुना विंशति-यात्राप्रकोष्ठैः सहितं चलिष्यति येषां संख्यापूर्वम् अष्टपरिमितम् आसीत् सहैव अनेन अस्याः क्षमतायां, परस्परसम्पर्के, यात्रासौविध्ये च परिष्कारः विधास्यते । वन्देभारतरेलयानस्य विस्तारेण यात्रिणः जम्मू-श्रीनगरयोः मध्ये पञ्चहोराभ्यन्तरम् एव यात्रां कर्तुं शक्नुवन्ति। अस्मिन् अवसरे केंद्रीय-राज्य-मंत्री जितेंद्र सिंहः मुख्यमंत्री उमर अब्दुल्ला चापि अपस्थितौ स्तः । अस्मिन् अवसरे भाषमाणः, श्रीवैष्णवः अकथयत् यत् विगतेषु द्वादशवर्षेषु रेलयानसेवाक्षेत्रेषु महत्वपूर्णपरिवर्तनानि अभवन् । सः अकथयत् यत् जम्मू-कश्मीरात् सप्त्यधिक-त्रिशतमिति अनुच्छेदस्य अपाकरणानन्तरं अस्मिन् क्षेत्रे विकासस्य एका निरन्तरधारा प्रवहति । श्रीवैष्णवः अकथयत् यत् यात्रिणां याचनम् अनुसृता रेलविभागेन अस्मिन् रेलयाने यात्राप्रकोष्ठानां संख्या सम्वर्य विंशतिपरिमिता कृता। अस्माकं सम्वाददातृणा संसूचितं यत् अनेन पदक्षेपेन विशिष्टरूपेण वैष्णोदेवी मंदिरं प्रति गम्यमानाः तीर्थयात्रिणः अमरनाथयात्रिणः च लाभान्विताः भवितुं शक्नुवन्ति ।



## पाकिस्तानः अन्ताराष्ट्रिय-आतङ्कवादस्य केन्द्रम्, भारतं च सूचना-तन्त्रज्ञानयोः केन्द्रम् अस्ति - रक्षामंत्री राजनाथसिंहः

रक्षामंत्री राजनाथसिंहः पाकिस्तानम् अन्ताराष्ट्रियातङ्कवादस्य केन्द्रं भारतं च सूचना-प्रौद्योगिक्योः केन्द्रम् इत्यकथयत् । नवदेहल्याम् आयोजिते 'राष्ट्रिय सुरक्षा-शिखर-सम्मेलने' भाषमाणः, सः अकथयत् यत् 'सिन्दूराभियानेन जगति सन्देशं प्रसारितं यत् भारतं कस्यामपि परिस्थितौ कीदृशीम् अपि आतङ्कि-गतिविधिं न सहिष्यति । श्रीसिंहः अकथयत् भारतम् अधुना तद्राष्ट्रं न अस्ति यत् पुरातन-मानसिकतया सह अग्रे वर्धते स्म, यत्र अस्माकं धरायां आतङ्क्याक्रमणानि भवन्ति स्म वयं च केवलं कूटनीतिकवक्तव्यानि प्रददति स्म । सः सर्वकारस्य तन्त्रीतिं पुनः स्मारितवान् यत् आतंकवादस्य तस्य प्रायोजकानां च मध्ये कीदृशः अपि भेदः न करिष्यते । मन्त्रिवर्येण देशे आर्टिफिशियल इंटेलिजेंस् इति कृत्रिमबुद्धिमत्तायाः भूमिका अपि प्रकाशिता । तेन प्रोक्तं यत् एतत् तन्त्रज्ञानं भारतीयसुरक्षाबलानाम् एकः अभिन्नः अङ्गः सञ्जातः । सः पुनः अकथयत् यत् अस्यां नवीनव्यवस्थायां AI इति कृत्रिमबुद्धिमत्ता कस्यापि देशस्य रणनीतिकव्यवस्थायाम् अनिवार्यभागरूपेण सम्मिलिता भवति ।

# राहुलगाधिनः कार्यकर्तृभ्यः गुरुमन्त्रः- धरातलेन सह जुष्यन्ताम्, जनतायाः स्वरः भवन्तु; श्रेष्ठ- प्रदर्शने पुरस्कारः



**हिमसंस्कृतवार्ताः- काङ्गड़ा।**
काङ्ग्रेसपक्षस्य वरिष्ठनेता लोक सभायाः प्रतिपक्षनेता च राहुलगाधी गुरुवासरे काङ्गड़ा- नगरस्य समीपे 'गुप्तगङ्गा' इति यात्रीसदने त्रिभ्यः राज्येभ्यः आगतानां जनपद-काङ्ग्रेस-अध्यक्षाणां प्रशिक्षणशिविरे कार्यशालायां च उत्साहं पूरितवान्। तेन उक्तं यत् सङ्घटनं सुदृढं कर्तुं जनपद- अध्यक्षेभ्यः स्वतन्त्ररूपेण निर्णय-स्वीकरणस्य अधिकारः प्रदास्यते। ये जनपद-अध्यक्षाः श्रेष्ठं प्रदर्शनं करिष्यन्ति, तेभ्यः पक्षे महत्तरं दायित्वं समर्पयिष्यते। बूथस्तरे कार्यं कुर्वन्तः निष्ठावन्तः परिश्रमिणश्च कार्यकर्तारः अपि उचितं सम्मानं अवसरं च प्राप्स्यन्ति। राहुलेन कथितं यत् कार्यकर्तारः स्वमानसात् भयं समाप्य आत्मविश्वासं जागृतं कुर्वन्तु। ते अवसादमुक्ताः भूत्वा धरातलं प्राप्य जनसामान्यानां स्वरः भवन्तु, किन्तु अस्मात् पूर्वं तेषु आत्मविश्वासस्य जागरणम् आवश्यकम्। हिमाचल-पञ्जाब-जम्मू-कश्मीर-काङ्ग्रेस-जनपदाध्यक्षैः सह संवादं कुर्वन् राहुलगाधी सङ्घटन- विषयकान् प्रश्नान् अपृच्छत् परामर्शान् च अयाचत। प्रातः ८:०० वादनतः अपराह्णे २:०० वादनपर्यन्तं प्रवृत्तायां कार्यशालायां राहुलगाधी सङ्घटनस्य नूतन- ऊर्जा- प्रदाने कामपि न्यूनतां न रक्षितवान्।
तेन उक्तं यत् जनपद-सङ्घटनस्य विविधपदेषु नियुक्तयः जनपद- अध्यक्षाः स्वविवेकतः कुर्वन्तु। जनपद-अध्यक्षाः न्यायाधीशः (Judge) इव निष्पक्षतया कार्यं कुर्युः, न तु अधिवक्ता इव पक्षपातपूर्णं व्यवहारं कुर्युः। पक्षस्य सुदृढतायाः आधारः सुदृढ-बूथ-केन्द्राणि सन्ति। एतदर्थं आवश्यकम् अस्ति यत् सत्यानां समर्पितानां च कार्यकर्तृणां परिचयं कृत्वा तेभ्यः दायित्वं दीयेत। जनतायाः समस्यानां समाधानं प्राथमिकतया करणीयम्। तेन कथितं यत् पक्षस्य प्रकृत-शक्तिः तस्य सङ्घटनं, बूथ-स्तरे च कार्यं कुर्वन् सत्यः कार्यकर्ता एव अस्ति।

# सावधानाः भवन्तु! 'व्हाट्स-अप्' (WhatsApp) माध्यमेन लोटरी-छलेन प्रलोभयन्ति 'साइबर'-तस्कराः, जानन्तु कथं रक्षयेत् स्वम्




**यदि सतर्कता न भवेत् तर्हि धूर्ताः भवतः अधिकोषं रिक्तं करिष्यन्ति**
हिमसंस्कृतवार्ताः - शिमला।'साइबर'-तस्कराः प्रतिदिनं जनान् वञ्चयितुं नूतनान् मार्गान् अन्विष्यन्ति। अधुना तस्कराणां दृष्टिः 'व्हाट्स-अप्' प्रयोक्तृषु वर्तते, यतोहि एतेषां सङ्ख्या अत्यधिका अस्ति। 'इन्स्टैण्ट मैसेजिंग्' तन्त्रांशः 'व्हाटट्स-अप्' अद्यत्वे 'हैकिंग्' इत्यस्य आखेटे भवति। 'व्हाट्स-अप्' मध्ये एकं नूतनं वञ्चना-प्रकरणं सम्मुखम् आगतं वर्तते, यत्र तस्कराः जनान् लोटरी-प्रलोभनेन वञ्चयन्ति। एतादृश-वञ्चनायाः प्रकरणाणि दृष्ट्वा आरक्षक-कोशिका (Cyber Cell) शिमला इत्यनया अपि परामर्शः (एडवाइजरी) निर्दिष्टः।
कथ्यते यत् एतेषु अधिकांशाः तस्कराः विदेशेषु स्थिताः सन्ति तथा च सन्देश-माध्यमेन भारतीयान् आकर्षयन्ति। आरक्षकदलेन उक्तं यत् यदि एतादृशः कश्चन सन्देशः आगच्छति, तर्हि तं 'उपेक्षितं ( इग्नोर) कुर्वन्तु, यतोहि एषा वञ्चना अस्ति। व्हाट्स-अप् सन्देशे लिख्यते यत् भवतः पञ्जीकृत-सङ्ख्या 'लकी-ड्रॉ' प्रतियोगितायां चिता अस्ति तथा च प्रयोक्तारः २५ लक्षं रूप्यकाणां नकद-पुरस्कारं प्राप्स्यन्ति। एतादृश्याम् साइबर-वञ्चनायां धूर्ताः अज्ञात-सङ्ख्याभ्यः पीडितेभ्यः व्हाटट्स-अप् सन्देशान् प्रेषयन्ति। तेषु अधिकांशाः +९२ (पाकिस्तानस्य आईएसडी-कोड) इत्यतः आरभन्ते।
२५ लक्षं रूप्यकाणां लोटरी-धनं प्राप्तुं ते पीडितं कश्चन व्यक्तिं सम्पर्कं कर्तुं वदन्ति, यस्य सङ्ख्या तस्मिन्नेव सन्देशे दत्ता भवति। यदा पीडितः राशिं प्राप्तुं सम्पर्कं करोति, तदा धूर्ताः वदन्ति यत् पूर्वं 'प्रक्रिया-शुल्करूपेण' (Processing fee) तथा 'जीएसटी' (GST) इत्यस्मै काचित् राशिः दातव्या भविष्यति, या पुनः प्रतिप्रदास्यते (Refundable)। एकदा पीडितः धनं जमा करोति, ततः ते केनापि व्याजेन अधिकं धनं याचन्ते।
वञ्चकाः केवलं व्हाट्स-अप् माध्यमेन एव संवादाय आग्रहं कुर्वन्ति। ते पीडितं विविधेषु अधिकोष-संख्यासु (Bank Accounts) धनं स्थापयितुं प्रेरयन्ति। एषा वञ्चना सप्ताहान् मासान् यावत् चलति। किञ्चित् कालानन्तरं ते पीडितं वदन्ति यत् लोटरी-राशिः वर्धिता—पूर्वं ४५ लक्षं, पुनः ७५ लक्षं इत्याद्याः, येन पीडितः प्रलोभितः एव तिष्ठेत्। अन्ते यदा पीडितः धनं याचति अथवा अधिकं धनं दातुं निराकरोति, तदा ते आह्वानं (Call) स्थगयन्ति तथा च व्हाट्स-अप् सङ्ख्याः पिदधति।

**वञ्चनायाः रक्षणाय एताः सावधानताः आचरन्तु**
डीआईजी (साइबर-क्राइम) रोहित मालपानी महोदयः कथयति यत् उपभोक्तृणां पार्श्वे वञ्चना-निवारणाय ज्ञानं भवेत्। केचन उपायाः अत्र अपि उच्यन्तेः
> कश्चन सन्देशः यः सूचयति यत् भवन्तः लोटरी वा पुरस्कारं वा जितवन्तः, सः सर्वथा मिथ्या अस्ति।
> एतादृश-सन्देशेषु व्याकरण-त्रुटयः, अशुद्धं प्रारूपं च स्पष्टं दृश्यते।
> एते वञ्चकाः भवतः लोभस्य लाभं स्वीकुर्वन्ति। लोभकारणात् जनाः परिवार-सदस्यैः सह चर्चां कर्तुं विस्मरन्ति।
> कस्यामपि वास्तविक-लोटरी-प्रक्रियायां कर-राशिः (Tax) पुरस्कार-राशितः एव कर्त्यते, न तु पूर्वं याच्यते। अतः स्वयं पृच्छन्तु—यदि धनं जितं तर्हि पूर्वं धनं किमर्थं दातव्यम्? यतोहि एषा वञ्चना अस्ति।

**कथं कुर्यात् उपालम्भम् ?**
डीआईजी रोहित मालपाणिना उक्तं यत् वञ्चनायाः अधिग्रहणे जातः जनः सम्बद्ध-व्यक्ति-जालपुटादीनां विवरणं, सन्देशस्य छायाचित्रं (Screenshot/Copy), अधिकोष-व्यवहारस्य (Bank transaction) विवरणं च स्वीकृत्य स्वसमीपस्थे आरक्षक-स्थाने (Police Station) उपालम्भं पञ्जीकर्तुं शक्नोति।

# सर्वोच्चन्यायालयेन केन्द्रं दुष्कर्मपीडितानां गर्भधारणस्य विंशति सप्ताहात् परं समापयितुं विधिव्यके संशोधनाय विचारयितुं उक्तम्



सर्वोच्चन्यायालयेन AIIMS इति अखिलभारतीयायुर्विज्ञानसंस्थानेन प्रख्यापिता एका याचिका अधिकृत्य आपत्तिः प्रकटिता यस्यां तम् आदेशं निरस्तीकर्तुं याचनं कृतम् आसीत् यस्मिन् आदेशे एकस्यै पञ्चदशवर्षीयायै कन्यायै स्वकीयां त्रिंशत्सप्ताहस्य गर्भावस्थां चिकित्सकीयरूपेण समापयितुम् अनुमतिः प्रदत्ता। न्यायालयेन केन्द्र-सर्वकारः अधिनियमे संशोधनाय अपि विचारं कर्तुम् प्रोक्तः, येन दुष्कर्मपीडिताः महिलाः विंशतिसप्ताहानन्तरम् अपि अवांछितगर्भ समाप्तं कर्तुम् अनुमताः स्युः । न्यायालयेन टिप्पणिः कृता यत् दुष्कर्मघटनया समावाप्ते गर्भावस्थाप्रकरणे कीदृशी अपि कठोरा समयसीमा न स्यात् । न्यायालयः सबलम् अकथयत् यत् अधिनियमाः गतिशीलाः समयानुसारं परिवर्तनशीलाः च स्युः । मुख्यन्यायाधीशः सूर्यकांतः न्यायमूर्ति जॉयमाल्य-बागची इति द्वयोः पीठेन प्रोक्तं यत् एषः बाल-दुष्कर्मस्य प्रकरणम् आसीत् यदि गर्भपातस्य अनुमतिः न प्रयच्छेत्, तर्हि पीड़िता आजीवनं मानसिकाघातं वहिष्यति ।

# ऋतुविज्ञानविभागेन आगामिसु दिनत्रयेषु पश्चिम-राजस्थाने उष्णतरङ्गस्य स्थितेः संभावना प्रकटिता



भारत-ऋतु-विभागेन पश्चिम-राजस्थाने आगामि दिनत्रयेषु उष्णतरङ्गस्य स्थितेः संभावना प्रकटिता अस्ति। तटीय-आन्ध्रप्रदेशे, ओडिशायां, तमिलनाडु राज्ये, पुदुचेरी प्रदेशे, कारैकल प्रदेशे च आगामि दिनद्वयोः उष्णार्द्र ऋतोः स्थितिः भविष्यति। ऋतुविभागेन अद्य अरुणाचलप्रदेशे, असम-राज्ये, मेघालये, नागालैण्ड-राज्ये, मणिपुरे, मिजोरमे, त्रिपुरायाम्, उपहिमालयीये पश्चिमवङ्गप्रदेशे, सिक्किमे च प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम् अस्ति। केरलम्, माहे, तमिलनाडु, पुदुचेरी, कारैकल इत्येतेषु प्रदेशेषु मई-मासस्य द्वितीय-दिनाङ्कपर्यन्तं प्रचण्डवृष्टिः भविष्यति। ततः परं श्वः बिहारे, उत्तराखण्डे, छत्तीसगढे, झारखण्डे, मध्यप्रदेशे, ओडिशायां, पश्चिमबङ्गे, पूर्वोत्तर राज्येषु च मेघगर्जनेन सह विद्युद्योतनं भविष्यति। श्वः पूर्वी राजस्थानस्य, दक्षिणान्तरिक-कर्नाटकस्य, तेलङ्गाना-राज्यस्य, तटीय-कर्नाटकस्य, तटीय-आन्ध्रप्रदेशस्य, उत्तरान्तरिक-कर्नाटकस्य, रायलसीमायाः च क्षेत्रेषु अपि एतादृशी स्थितिः भविष्यति।

# नैतिकता-मौलिकता-समर्पणभावैः सह अनुसन्धानं कुर्वन्तु शोधार्थिनः- आचार्यः ललितकुमार अवस्थी



## सरदारपटेल-विश्वविद्यालये 'इतिहास- अनुसन्धान-पद्धतिः' इति विषये अतिथिव्याख्यानस्य आयोजनम्

हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा। सरदार- पटेल-विश्वविद्यालय- मण्डीनगरस्य इतिहास- विभागेन 'इतिहास-अनुसन्धान-पद्धतिः- उद्देश्यानि आह्वानानि च' इति विषये एकस्य महत्त्वपूर्णस्य अतिथि-व्याख्यानस्य साफल्येन आयोजनं कृतम्। कार्यक्रमस्य मुख्यातिथिरूपेण विश्वविद्यालयस्य कुलपतिः आचार्यः ललितकुमार अवस्थी-महोदयाः राष्ट्रिय- शिक्षा- नीति २०२० इत्यस्य सन्दर्भे शोधस्य गुणवत्ता- नवाचार-अन्तः विषयकदृष्टीनां महत्त्वं प्रतिपादितवन्तः। ते छात्रान् नैतिकता-मौलिकता-समर्पणभावैः सह अनुसन्धानं कर्तुं प्रेरितवन्तः। कुलपतयः उक्तवन्तः यत् अनुसन्धानं तु एका निरन्तरा धैर्यपूर्णा च प्रक्रिया वर्तते, यत्र जिज्ञासा अनुशासनं च अनिवार्यं भवतः। सफलः शोधार्थी स एव यः नित्यं प्रश्नान् पृच्छति तेषाम् उत्तरं च अन्वेष्टुं प्रयतते। ते शोधकार्ये नैतिकतायाः महत्त्वं विविच्य मौलिकता- पारदर्शिता- सत्यनिष्ठानाम् आवश्यकतां प्रदर्शितवन्तः, 'साहित्यिक-चौर्यस्य' निवारणं स्रोतानां च उचित- सन्दर्भ- प्रदानं प्रत्येकस्य शोधार्थिनः दायित्वं घोषितवन्तः। कार्यक्रमस्य मुख्यवक्ता क्षेत्रीय-केन्द्र-खनियारा (धर्मशाला) इति इतिहास-विभागस्य संयोजकः डॉ. राजकुमारमहोदयः आभासीमाध्यमेन इतिहास-अनुसन्धान- पद्धतेः विविधान् आयामन् विस्तृतवान्। सः स्रोत-सामग्री-चयनं, प्राथमिक- द्वितीयक- स्रोतानां महत्त्वं, तथ्यात्मक-विश्लेषणं, व्याख्या-विधयः, शोध-लेखनस्य तन्त्राणि इति विषयान् प्रकाशितवान्। तेन स्पष्टीकृतं यत् इतिहासलेखने निष्पक्षता, आलोचनात्मक-दृष्टिः, प्रमाणिकता च परमावश्यका वर्तते। ते शोधार्थिनः 'फील्ड-वर्क' (क्षेत्रकार्यम्), अभिलेखागाराणाम् उपयोगं डिजिटल-संसाधनानां च समुचित-प्रयोगं कर्तुं प्रोत्साहितवन्तः। कार्यक्रमस्य संयोजकाः शैक्षणिक-विषयानां सह-अधिष्ठाता विभागाध्यक्षाश्च डॉ. राकेशकुमार शर्मा अतिथीनां स्वागतं कुर्वन्तः अवदन् यत् एतादृशानि व्याख्यानानि छात्राणां शोध- कौशल- विकासाय, इतिहास-अनुसन्धानस्य गाम्भीर्यं व्यापकतां च अवबोधयितुम् अतीव सहायकानि भवन्ति। प्रश्नोत्तरसत्रे शोधसम्बन्धिताः व्यावहारिक- समस्याः, विषयचयनं, सन्दर्भलेखनं शोधप्रबन्धस्य संरचना च इति विषयेषु सार्थका चर्चा अभवत्।अस्मिन् अवसरे विभागाध्यक्षः डॉ. राकेशकुमारशर्मा, वरिष्ठलेखकः प्रकाशचन्द धीमानः, विद्या शर्मा, विनोद बहलः, धर्मेन्द्र राणा, डॉ. पवन वैद्यः, शोधार्थिनः वेदप्रकाशः, राहुलकुमार डोल्मा, राजु, सूर्यप्रकाशः, छात्राः सानूकुमारः, दीपक दीपांशुः, मनीषकुमारः, महेश्वरसिंहः, पुष्पा, सनेहा, सुनीता, नरेन्द्र कुमारः, अन्ये शोधार्थिनश्च उपस्थिताः आसन्। इदं व्याख्यानम् अकादमिक-दृष्ट्या अतीव उपयोगी समसामयिकं च आसीत्।

# वायौ विचरति सुक्खु-सर्वकारः, धरातले विकासः शून्यः- जयरामठाकुरः

**हिमसंस्कृतवार्ताः- शिमला।** प्रतिपक्षनेता पूर्वमुख्यमन्त्री च जयरामठाकुरः मण्डी-नगरात् प्रसारिते वार्ता-वक्तव्ये मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु-महोदयस्य तस्य सर्वकारस्य च कार्यशैल्यां गम्भीरान् प्रश्नान् उत्थापितवान्। तेन उक्तं यत् वर्तमानः प्रदेश-सर्वकारः केवलं मञ्चेभ्यः भाषणानि बृहत्-वचनानि च कर्तुं सीमितः अस्ति, यदा तु धरातले वास्तविक्ता एतस्मात् सर्वथा विपरीता निराशाजनिका च वर्तते। काङ्गड़ा- जनपदस्य ढगवार-क्षेत्रे निर्माणाधीनस्य २२५ कोटि- रूप्यकाणाम् अत्याधुनिक- दुग्ध- प्रसंस्करण- संयन्त्रस्य निरीक्षणकाले मुख्यमन्त्रिणा अधिकारिणां भर्त्सनं कार्यस्थगनं च कृतम्। अस्याः घटनायाः उपरि प्रतिक्रियाम् अयच्छन् ठाकुरः अवदत् यत् एतत् पूर्णतया प्रशासनिक- विफलतायाः सर्वकारस्य अन्तः समन्वयस्य अभावस्य च प्रत्यक्षं प्रमाणम् अस्ति। तेन कटाक्षं कुर्वता पृष्टं यत् यस्याः परियोजनायाः पूर्णतायै फरवरी २०२६ पर्यन्तं लक्ष्यं निर्धारितम् आसीत्, तस्याः विषये अप्रैल-मासे आगत्य मुख्यमन्त्रिणः किमर्थं स्मृतिः आगता यत् तत्र यन्त्राणि न स्थापितानि अथवा तन्त्रज्ञाने (Technology) परिवर्तनं कृतम् अस्ति। तेन प्रश्नः कृतः यत् किं विगतमासेभ्यः अस्याः महत्त्वपूर्णायाः परियोजनायाः कोऽपि निरीक्षणं न क्रियते स्म अथवा सम्पूर्णः सर्वकारः एव सुप्तः अस्ति?जयरामठाकुरः अवदत् यत् मुख्यमन्त्रिणः एषः पक्षः यत् तेन 'ऑटोमैटिक' (स्वचालित) संयन्त्रं निर्मातुं कथितम् आसीत् किन्तु अधिकारिभिः 'मैनुअल' (हस्तचालित) तन्त्रज्ञानं प्रयुक्तम्, एतत् दर्शयति यत् मुख्यमन्त्रिणः निर्देशाणां तस्यैव विभागे किमपि महत्त्वं नास्ति। सञ्चिकासु (Files) तत् सर्वं भवति यस्य ज्ञानं मुख्यमन्त्रिणे मासाभ्यन्तरे भवति। अधिकारिणः मुख्यमन्त्रिणः दुर्बलतां ज्ञातवन्तः, अतः ते अधुना स्वैरं व्यवहरन्ति। यदि मुख्यमन्त्रिणः निर्देशस्य अनुपालनं न जातम्, तर्हि उत्तरदायि-जनानां विरुद्धं का कार्यविधिः कृता?तेन आरोपः कृतः यत् सामाजिक-माध्यमेषु रौद्ररूपं प्रदर्श्य अधिकारिणां भर्त्सनं 'क्लास' इति वा स्वीकरणं केवलं राजनैतिक-प्रदर्शनं 'फोटो-ऑप' च अस्ति, येन स्वविफलताः गोपयितुं शक्येरन्। यदि सर्वकारः वास्तवमेव गम्भीरः अभविष्यत्, तर्हि समये एव तान्त्रिक-त्रुटयः निर्माणस्य मन्दगतिः च परिष्कृता अभविष्यत्, न तु परियोजनायाः अन्तिम- समयस्य समीपे आगत्य कार्यं स्थगयिष्यत्। पूर्वमुख्यमन्त्री स्पष्टीकृतवान् यत् २२५ कोटिरूप्यकाणां जनधनव्ययेन निर्मीयमाणस्य अस्य संयन्त्रस्य रूपरेखायां परिवर्तनेन गुणवत्तया सह च कृतः सहमतिः प्रदेशस्य हितैः सह क्रीडा अस्ति। एतत् सिद्धं करोति यत् सुक्खु-सर्वकारे निर्णयाः अन्यत्र स्वीक्रियन्ते, मुख्यमन्त्री तु केवलं मञ्चेषु 'घोषणावीरः' अभवत्। तेन प्रश्नः उत्थापितः यत् एतावद्भिनेषु एतत् कार्यं कस्य विश्वासं चलति स्म, तथा च किं मुख्यमन्त्री न जानाति यत् तस्य अस्याः "आकाशीय" (हवा-हवाई) कार्यप्रणाल्याः कारणेन प्रदेशस्य विकासकार्याणि पूर्णतया अवरुद्धानि जातानि सन्ति।



# जातिगत-जनगणनायाः रूपरेखा अद्यापि न स्पष्टा - जयरामरमेशः

हिमसंस्कृतवार्ताः - धर्मशाला।
काङ्ग्रेस-पक्षेण आरोपः कृतः यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे भाजपा-सर्वकारः कालक्षेप-वृत्तेः अनन्तरं यद्यपि जातिगत-जनगणनां कारयितुं सहमतः जातः, किन्तु जनगणना कथं भविष्यति इत्यस्य रूपरेखाम् अधिकृत्य अद्यापि कापि स्पष्टा नीतिः सम्मुखी न आगता। काङ्ग्रेस-सञ्चार-विभागस्य प्रभारी जयरामरमेशः गुरुवासरे सामाजिक-माध्यमे 'एक्स' (X) इत्यत्र अवदत् यत् अद्यतनः एकवर्षपूर्वं सर्वकारेण जनगणनायां जातिगत-गणनायाः मेलनस्य घोषणा कृता आसीत्, परन्तु एकवर्षानन्तरमपि अस्याः क्रियान्वयनं प्रति स्थितिः अद्यापि अस्पष्टा वर्तते।
तेन अस्मिन् विषये सर्वकारस्य व्यवहारे आगतं परिवर्तनं 'नाटकीय-यू-टर्न' (U-turn) इति उक्त्वा घटनाक्रमस्य क्रमवारम् उल्लेखः कृतः। तेन कथितं यत् २१ जुलाई २०२१ दिनाङ्के गृह मन्त्री अमितशाहः लोक सभायाम् अवदत् यत् सर्वकारेण नीतित्वेन जाति-आधारित-जनगणना न कारयितुं निर्णयः स्वीकृतः। पुनः २१ सितम्बर २०२१ दिनाङ्के केन्द्रसर्वकारेण उच्चतम-न्यायालये प्रदापिते शपथपत्रे (Affidavit) अपि एषैव स्थितिः पुनरावर्तिता। जयरामरमेशस्य अनुसारं १६ अप्रैल २०२३ दिनाङ्के पक्ष्याध्यक्षेण मल्लिकार्जुनखरगे-महोदयेन प्रधानमन्त्रिणे नरेन्द्रमोदिने पत्रं विलिख्य नियमित-जनगणनया सह अद्यतन-जाति-जनगणनायाः अभ्यर्थना कृता आसीत्। एतदपि अतीत्य २८ अप्रैल २०२४ दिनाङ्के एकस्मिन् साक्षात्कारे श्रीमोदिना एषा अभ्यर्थना 'अर्बन-नक्सल' (Urban Naxal) विचारधारया प्रेरिता इति उक्ता।
श्रीरमेशः अवदत् यत् अस्याः घोषणायाः एकवर्षानन्तरं ३० अप्रैल २०२५ दिनाङ्के सर्वकारेण जातिगत-जनगणनायाः घोषणा कृता, येन एतत् स्पष्टं भवति यत् सर्वकारस्य व्यवहारः निरन्तरं परिवर्तमानः अस्ति। तेन प्रधानमन्त्रिणः अस्मिन् वक्तव्ये क्षमां याचितुं देशस्य जनतायै च अस्य परिवर्तनस्य कारणानि स्पष्टीकर्तुं याचना कृता। तेन एषः अपि आरोपः कृतः यत् जातिगत-जनगणनायाः प्रक्रियाम् अधिकृत्य अद्यापि न तु विपक्षदलैः सह, न राज्यसर्वकारैः सह, न च विषय-विशेषज्ञैः सह कश्चन सार्थकः संवादः कृतः। तेन उक्तं यत् ५ मई २०२५ दिनाङ्के श्रीखड़गे-महोदयेन लिखितस्य पत्रस्य अपि किमपि प्रत्युत्तरं न दत्तं, यदा तु तस्मिन् उत्थापिताः विषयाः अद्यापि प्रासङ्गिकाः सन्ति। सद्यः सम्पन्नस्य संसदः विशेष-सत्रस्य उल्लेखं कुर्वन् काङ्ग्रेस-पक्षेण आरोपः कृतः यत् सर्वकारः एतं महत्त्वपूर्णं विषयं स्थगयितुम् इच्छति, अद्यापि अस्य स्पष्ट-रूपरेखायाः अभावः अस्यैव सङ्केतः अस्ति।

# संस्कृतविश्वविद्यालये नवनियुक्तः कुलसचिवः पदभारं स्वीकृतवान् अवदत्– विकासाय सर्वेषां सहयोगः अपेक्षितः



**हिमसंस्कृतवार्ता, राघव नाथ झा दरभङ्गा।** संस्कृतविश्वविद्यालये नवनियुक्तः कुलसचिवः डॉ दिनेश झा गुरुवासरे स्वपदभारं स्वीकृतवान्। गत २९ एप्रिल-दिने बुधवासरे राजभवनेन तस्य कुलसचिवपदे नियुक्तिः कृता आसीत्। एतां जानकारीं जनसम्पर्कपदाधिकारी डॉ निशिकांत अदात्। तेन उक्तं यत् कुलसचिवः डॉ झा कुलपतेः प्रो. लक्ष्मीनिवास पांडेय समक्षं तस्य कार्यालयकक्षे योगदानसम्बद्धाः सर्वाः प्रक्रियाः सम्पन्नवान्।
अस्मिन् अवसरे कुलपतिः प्रो. पाण्डेयः उक्तवान् यत् नूतनः कुलसचिवः स्वनामानुरूपं कार्यसम्पादनं करिष्यति। सः पूर्वमेव विश्वविद्यालये पदाधिकारीरूपेण कार्यरतः आसीत्, अतः सर्वे तस्य कार्यशैलीं सम्यक् जानन्ति। एतादृशे सति विश्वविद्यालयस्य प्रगतिर्निश्चितरूपेण भविष्यति। तेन तस्मै शुभाशंसाः अपि प्रदत्ताः।
पदभारग्रहणानन्तरं कुलसचिवः डॉ झा सर्वान् सम्बोध्य अवदत् यत् नियम-परिनियमानुसारं राज्यसरकारस्य तथा राजभवनस्य निर्देशानुसारेण एव सर्वाणि कार्याणि क्रियिष्यन्ते। अनावश्यकतया सञ्चिकाः न निरुध्यन्ते। विश्वविद्यालयस्य विकासाय प्रशासनिककार्याणां सुदृढीकरणाय च सर्वेषां सहयोगः अपेक्षितः।
तेन स्वीकृतं यत् विश्वविद्यालये बहवः विषयाः सन्ति, ये परस्परं मिलित्वा समाधानं नेतुं शक्यन्ते। सः अपि अवदत् यत् आगामिषु कतिपयेषु दिवसेषु कार्यसंस्कृतौ सकारात्मकः परिवर्तनः अवश्यं दृश्यते। सः कुलपतये प्रो. पाण्डेयाय तथा महामहिम्ने कुलाधिपतये च कृतज्ञतां प्रकटितवान्।
अपरतः विश्वविद्यालयकर्मचारीसंघस्य अध्यक्षः रघुनन्दन लाल कर्ण सचिवश्च अभिमन्यु कुमार इत्येतयोः नेतृत्वे कुलपतिः कुलसचिवश्च पाग्-चादर-पुष्पमालाभिः सम्मानितौ। संघस्य पदाधिकारिणः सदस्याश्च नवनियुक्तकुलसचिवाय पूर्णसहयोगस्य आश्वासनं दत्तवन्तः। तैः उक्तं यत् कुलसचिवः अस्य विश्वविद्यालयस्य स्वकीयः अस्ति। तस्मै संस्थायाः सामर्थ्यं दुर्बलता च सम्यक् ज्ञाता अस्ति। अतः सर्वान् साथीकृत्य विश्वविद्यालयं नूतनशिखरं प्रति नेतुं सुलभं भविष्यति।अस्मिन् अवसरे विश्वविद्यालयस्य सर्वे पदाधिकारिणः कर्मचारीणश्च उपस्थिताः आसन्।

# कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालये,
## नलबार्यां भारतीय-ज्ञान-परम्परा-केन्द्रस्य तत्त्वावधाने विशेषव्याख्यानकार्यक्रमः






हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः। २९-अप्रैल-दिनाङ्के (बुधवासरे) पूर्वाह्णे एकादशवादने नलबारीस्थित- कुमारभास्करवर्म- संस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य भारतीय- ज्ञान-परम्परा- केन्द्रस्य अधीनम् एकः विशेष-व्याख्यान- कार्यक्रमः आयोजितः। विश्वविद्यालयस्य IQAC इत्यस्य सहयोगेन आयोजितेऽस्मिन् कार्यक्रमे विषयविशेषज्ञरूपेण उपस्थाय एम्स-गुवाहाटी- संस्थानस्य आयुष- विभागस्य चिकित्साधिकारी डॉ. मानवज्योतिशर्मा "आयुर्वेदः स्वास्थ्यस्य आरोग्यस्य च सिद्धान्ताः" इति विषये व्याख्यानं प्रदत्तम्। भाषणप्रसङ्गे डॉ. शर्मा भारतीय-ज्ञान- परम्परायाम् आयुर्वेदस्य महत्त्वं विषदीकृतवन्तः। विश्वविद्यालयस्य शिक्षाविभागस्य सहायकाध्यापिका डॉ. कृष्णा कलिता इत्यनया सञ्चालितस्य गम्भीर-कार्यक्रमस्य शुभारम्भः दीपप्रज्वलनेन अभवत्। कार्यक्रमस्य मङ्गलाचरण-पाठः विश्वविद्यालयस्य वेद-अध्ययन-विभागस्य सहायकाध्यापकः महेश- चिदम्बरम भट्टेन कृतः। विश्वविद्यालयस्य भारतीय-ज्ञान-परम्परा-केन्द्रस्य निदेशकः प्राध्यापकः विकासभार्गवशर्मा स्वागतभाषणं कृतवान्, विश्वविद्यालयस्य रेक्टर-प्राध्यापिका मल्लिका कलिता इत्यनया कार्यक्रमस्य शुभारम्भः कृतः। विश्वविद्यालयस्य कुलसचिवः डॉ. मनोजकुमारशर्मा शुभकामनाभाषणं प्रदत्तवान्। कार्यक्रमस्य अन्ते विश्वविद्यालयस्य धर्मशास्त्र-विभागस्य सहायकाध्यापिका डॉ. मैत्रेयी गोस्वामी धन्यवादज्ञापनं कृतवती।
विश्वविद्यालयस्य कुलपतेः सभागारे आयोजितस्मिन् विशेषव्याख्यानकार्यक्रमे परीक्षानियन्त्रकः डॉ. प्रशान्त- ज्योतिगौतमः, वित्तकोषाध्यक्षः शुभ्रोत्पलबरठाकुरः, IQAC निदेशिका डॉ. नवनीता शर्मा, Research and Development इत्यस्य निदेशकः प्राध्यापकः रातुल बुजरबरुवा, विभिन्न-विद्याशाखानां डीन महोदयाः, विभागाध्यक्षाः, विविध-विभागानाम् प्राध्यापकाः, विश्वविद्यालयस्य शिक्षकेतर-कर्मचारिणः, शोधकर्तारः छात्राश्च उपस्थिताः आसन्।



# “अकबर बीरबल कथा”
# “कः विद्वान्?”

बादशाहा अकबरस्य राजसभायां देश-विदेशतः विद्वांसः आगच्छन्ति स्म। स्वकला अकबरं दर्शयित्वा उपहारं स्वीकरणीयं एव विदुषां कार्यम् आसीत्।
कश्चित् विद्वान् राजसभायाम् आगतः। अकबरः तस्य आदरं कृतवान्। आगमनस्य कारणं पृष्टवान्। अहं भवतः राजसभायां विदुषः कानिचित् प्रश्नानि प्रक्ष्यामि यदि उत्तराणि सम्यक् अस्ति चेत् तस्मै अहं मम हस्तस्य कनककङ्कणं दास्यामि। विदुषः एतादृशी भाषा श्रुत्वा अकबरः मन्दं-मन्दं हसितः। पृच्छतु प्रश्नान्! अकबरस्य अनुमतिनन्तरं तेन प्रथमः प्रश्नः पृष्टः।
{१} अहं सर्वत्र अस्मि किन्तु मम निवासस्थाने कोऽपि प्रवेशं कर्तुम् असमर्थः। अहं सागरे, आकाशे, भूमौ सञ्चरामि। अहं सर्वत्र अस्मि किन्तु कोऽपि मां द्रष्टुं न शक्नोति, मां गृह्णीतुं सर्वे हि असमर्थः, मम विना जगतः रुद्धः भवति। तर्हि कोऽहम्?
प्रश्न कठिन अस्ति। सर्वः सभासदः परस्परस्य मुखावलोकनं करोति। सर्वत्र शान्तता प्रसृताः। तदा बीरबलः उत्थाय प्रत्युवाच- अस्य प्रश्नस्य उत्तरं ''वायुः'' अस्ति। विद्वान् उत्तरं बाढम् इति अवदत्। तदनन्तर सः अन्यं प्रश्नं पृष्टवान्। द्वितीयः प्रश्नः किञ्चित् कठिनम् अस्ति।
{२} अहं सर्वेषाम् उपस्थितोस्मि, मम विना न कोपि जीवति, मम अमर्याद सत्ता अस्ति। तर्हि अहं एकस्मिन् स्थाने प्रतिबद्धः अस्मि। यदा मम मित्रं माम साहाय्यं करोति तदा अहं बर्हिगच्छामि। तर्हि कोऽहम्? सभासदाः मौनेन तिष्ठाः सर्वत्र पुनः शांतता प्रसृता। विद्वान् चिन्तितम्– अहं विजयी अस्मि, मम प्रश्नस्य उत्तरं दातुं सर्वैः असमर्थाः। बीरबलः तम् अवलोकितवान् तस्मिन् क्षणे पुनः बीरबलः उत्थाय प्रत्युवाच– अस्य प्रश्नस्य उत्तरोऽस्ति '' मनः'' इति।
उत्तरं निर्दोषम् अस्ति। यथार्थः उत्तरः बीरबलेन दत्तः। विद्वान् अतीवः प्रमुदितः। तत्क्षणेव सः स्वहस्तात् कङ्कणं बीरबलाय अयच्छत्, राजसभातः निर्गतः |

**डॉ. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# कैलाश-मानसरोवर-यात्रा जून-मासतः अगस्त-मासपर्यन्तं भविष्यति

अस्मिन् वर्षे कैलाश-मानसरोवर-यात्रा जून-मासतः अगस्त-मासपर्यन्तं आयोजयिष्यते। दश जत्थाः (यात्रि-समूहाः) उत्तराखण्ड-मार्गेण लिपुलेख-दर्रां पारं करिष्यन्ति। प्रत्येकस्मिन् समूहे पञ्चाशत् (50) यात्रिणः भविष्यन्ति। अन्ये दश समूहाः सिक्किम-राज्यमार्गेण नाथू-ला-दर्रां पारं करिष्यन्ति। विदेश-मन्त्रालयेन उक्तं यत् अस्याः यात्रायाः कृते आवेदपत्राणि 'केएमवाई डॉट जीओवी डॉट आईएन' (kmy.gov.in) इति जालपुटे स्वीक्रियन्ते।विदेश-मन्त्रालयः चीन-सर्वकारेण सह समन्वयं कृत्वा एतां यात्रां आयोजयति। अस्याः यात्रायाः पूर्णा प्रक्रिया सङ्गणकीकृता (computerized) अस्ति। यात्रा-पञ्जीकरणं मई-मासस्य 19 दिनाङ्कपर्यन्तं कर्तुं शक्यते।

# विश्वशान्त्यै बौद्धधर्मस्य आवश्यकता(पर्वविशेष)



डॉ विमलेश झा, डीएवी पब्लिक स्कूल बरारी ,भागलपुर बिहार

सम्प्रति विश्वे सर्वत्र अशान्तिः, हिंसा, द्वेषः, स्पर्धा, आतंकवादः च वर्धमानः दृश्यते। राष्ट्राणां मध्ये कलहः, समाजे असमानता, व्यक्तिषु मानसिकसंघर्षः—एते सर्वे मानवजीवनं क्लिष्टं कुर्वन्ति। अतः विश्वशान्त्यै कस्य मार्गस्य अनुसरणं करणीयम् इति प्रश्नः सर्वेषां सम्मुखे तिष्ठति। अस्मिन् सन्दर्भे बौद्धधर्मः अत्यन्तं उपयुक्तः, प्रासङ्गिकः च अस्ति। गौतमबुद्धेन प्रतिपादितः बौद्धधर्मः न केवलं एकः धर्मः, अपि तु जीवनदर्शनम् अस्ति, यः मानवजीवनं शुद्धं, सरलम्, शान्तिपूर्णं च कर्तुं समर्थः अस्ति। बौद्धधर्मः अहिंसा, करुणा, मैत्री, समता च इत्येतान् मूलसिद्धान्तान् मत्वा प्रतिष्ठितः अस्ति। अयं धर्मः अन्धविश्वासान्, यज्ञकर्मकाण्डान् च त्यक्त्वा व्यवहारिकजीवनस्य सुधारं प्रमुखतया स्वीकरोति।
बुद्धः अवदत् यत्—"दुःखम् अस्ति""दुःखस्य कारणं तृष्णा अस्ति" "दुःखस्य निरोधः संभवः विद्यते""निरोधमार्गः अस्ति"एतानि "चत्वारि आर्यसत्यानि" इति प्रसिद्धानि। विश्वशान्तेः मूलं अहिंसा अस्ति। बौद्धधर्मे अहिंसायाः सर्वोच्चं स्थानम् अस्ति। बुद्धः शिक्षयति— "न हिंसया हिंसा निवर्तते, अपि तु प्रेम्णा एव।" यदि राष्ट्राणि, समाजः, व्यक्तयः च अहिंसां स्वीकुर्वन्ति, तर्हि युद्धाः, आतंकवादः, अपराधाः च न्यूनाः भविष्यन्ति।बौद्धधर्मे "करुणा" (दयाभावः) तथा "मैत्री" (मित्रभावः) अत्यन्तं महत्त्वपूर्णे स्तः। सर्वेषु प्राणिषु समानदृष्टिः धार्यते।
यदि मानवः—परेषां दुःखं स्वदुःखवत् अनुभवेत्, सर्वेषां प्रति मैत्रीभावं धारयेत्,तर्हि समाजे शान्तिः स्वयमेव स्थापिता भविष्यति।
बौद्धधर्मः जातिभेदं, असमानतां च न स्वीकरोति। बुद्धः सर्वे मानवाः समानाः इति प्रतिपादितवान्।
अयं सिद्धान्तः आधुनिकविश्वे अत्यन्तं आवश्यकः अस्ति, यतः जातीयद्वेषः,वर्णभेदः,सामाजिकअसमानता एतेषां कारणेन एव अशान्तिः जायते।
बुद्धः "मध्यममार्गम्" उपदिष्टवान्। अयं मार्गः न अतीव भोगे, न अतीव तपसि अपि तु संतुलितजीवनस्य मार्गः अस्ति। यदि मानवः मध्यममार्गं अनुसरति तर्हि तस्य जीवनं संतुलितं भवति।मानसिकशान्तिः लभ्यते,लोभः, क्रोधः, मोहः च क्षीयन्ते।बौद्धधर्मस्य अष्टाङ्गिकमार्गः जीवनस्य शुद्धिकरणाय महत्त्वपूर्णः अस्ति— सम्यक् दृष्टिः,सम्यक् संकल्पः,सम्यक् वाक्, सम्यक् कर्म,सम्यक् आजीविका,सम्यक् व्यायामः, सम्यक् स्मृतिः,सम्यक् समाधिः। एतेन मार्गेण मानवः आत्मशुद्धिं प्राप्नोति, यः विश्वशान्तेः आधारः अस्ति।
इदानीं मानवेषु मानसिकचिन्ता, अवसादः च सर्वत्र दृश्यते। बौद्धधर्मः ध्यानम्, विपश्यना, आत्मचिन्तनम् इत्यादीनि साधनानि प्रदत्तवान्।एतेन—मनः शान्तं भवति।क्रोधः न्यूनः भवति,धैर्यं वर्धते।मानसिकशान्तिं विना विश्वशान्तिः दुर्लभाअस्ति।अद्य विश्वे विविधदेशेषु बौद्धधर्मस्य प्रभावः दृश्यते। अनेके जनाः ध्यानयोगं, अहिंसामार्गं, करुणाभावं च स्वीकुर्वन्तः सन्ति।विश्वसंस्थाः अपि शान्तिस्थापनाय बौद्धसिद्धान्तान् महत्त्वं ददति। बौद्धधर्मः प्रकृतिसंरक्षणं अपि बोधयति। सर्वे प्राणिनः, वृक्षाः, नद्यः च पूज्याः सन्ति।यदि मानवः प्रकृतिं रक्षति,संसाधनानां दुरुपयोगं न करोति, तर्हि पर्यावरणसमस्या अपि भविष्यति।
विश्वशान्त्यां बौद्धधर्मस्य महत्वपूर्णं योगदानं भवितुमर्हति। यदि बौद्धधर्मस्य सिद्धान्ताः व्यवहारे वयं आनयामः तर्हि देशानां मध्ये युद्धाः न्यूनाः भविष्यन्ति,आतंकवादः समाप्तः भविष्यति,समाजे समरसता आगमिष्यति,।
अतः बौद्धधर्मः विश्वशान्तेः सशक्तः मार्गः अस्ति।
अत्र वयं वक्तुं शक्नुमो यत् बौद्धधर्मः केवलं एकः धर्मः नास्ति, अपि तु विश्वशान्त्याः आधारभूतं जीवनदर्शनम् अस्ति। यदि मानवजातिः—अहिंसां स्वीकरोति, करुणां वर्धयति,समतां स्थापयति,मध्यममार्गं अनुसरति, तर्हि विश्वे शान्तिः, सौहार्दं, सुखं च नूनं स्थापितं भविष्यति।अत्र स्मर्तव्यम्— "धर्मो रक्षति रक्षितः"।अतः वयं सर्वे मिलित्वा बौद्धधर्मस्य सिद्धान्तान् अनुसरिष्यामः , विश्वशान्तिं स्थापयिष्यामः। अन्ते च-

**शान्तं सौम्यं जितेन्द्रियं मुनिवरं**
**त्यागाभिरामं विभुम्।**
**लोकज्ञं करुणालयं गुणनिधिं**
**बुद्धं प्रपद्येऽन्वहम्॥इत्यलम्।**




# प्रणौमि गुरुवर्यं नो राधाकान्तगुणोत्तमम्

मिथिलायां जनिं लब्ध्वा विद्यावारिधिरुत्तमः
वास्तुज्योतिषशास्त्राणां पण्डितोऽयं गुणोत्तमः ।१।
समग्रभारतवर्षे विख्यातश्शास्त्रसंसरः
छात्रमानसहंसोऽसौ राधाकान्तमहाशयः ।२।
प्रचलदूरवाणीति कविस्स राष्ट्रमानितः
कविकुलशिरोरत्नो राधाकान्तःप्रकीर्तितः ।३।
लेखनी भास्वरा यस्य काव्यधारा निरन्तरा
निवृत्तिसमये तस्मै शुभाशंसा परात्परा ।४।
निवृत्तोऽपि हि सेवायास्साहित्यसाधने चणः
दीर्घायुस्स्वस्थचित्तस्स भूयात् लोकहितैषिणः ।५।
मार्गप्रदर्शकस्सम्यक् त्वं मे ह्यासीच्छुभङ्करः
तव ज्ञानप्रकाशेन कृतार्थोऽहं विभास्वरः ।६।
नम्रभावे नमस्कृत्य प्रार्थये ते शुभाशिषम्
भविष्येऽपि च मे सम्यक् कल्याणं कुरु सन्ततम्।७।

**भवतां गुणमुग्धो विनयावनतो रुरुकुमारः**
**राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः**




# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। प्रथमा
वार्ता अस्ति- एकेन तन्त्रांश-अभियन्त्रा छद्म- कार्य-साक्षात्कारेण वञ्चना प्राप्ता अस्ति। 'क्लौड्फेर' संस्थया सह सम्बद्धः इति मिथ्याकथनेन सः वञ्चितः।
**काव्या-** अति-कष्टकरमिदम्। जनेषु विश्वासः एव नष्टः अस्ति। वञ्चनायाः वार्तां श्रुत्वा मनसि खेदः भवति। द्वितीया वार्ता अस्ति- एकेन भारतीय- संस्थापकेन चत्वारिंशत्-सदस्यानां स्वगणस्य कृते प्रतिदिनम् एक-होरा-मितः 'कार्यालय-वनभोजः' अनिवार्यः कृतः।
**नन्दिनी-** एतत् तु अति-रोचकम्! कार्यालयस्य नीरस-वातावरणे एतादृशं कार्यं सुखदं भवति। परन्तु सर्वेषां परिस्थितिः समाना न भवति। तृतीया वार्ता अस्ति- चत्वारिंशत्-लक्ष-रुप्यकाणाम् ऋण- ग्रस्तः एकः विदेशस्थ-भारतीयः भारतस्य कर्मक्षेत्रे सङ्घर्षं करोति। तेन अमेरिका-देशस्य कार्य- अनुज्ञापत्रं न लब्धम्, अतः सः अतीव उद्विग्नः अभूत्।
**काव्या-** तस्य कष्टं महदस्ति। आशासे सः शीघ्रं कार्यं प्राप्स्यति। अन्तिमा वार्ता अस्ति- एकेन चित्र-प्रसारकेण पाचकस्य उपरि आरोपः कृतः अस्ति। पाचकेन भोजन-पात्रेषु निष्ठीवनं कृतम् इति छाया-चित्र-यन्त्रेण दृष्टम्।

# बुद्धपूर्णिमायै पूर्वसन्ध्यायां राष्ट्रपतिः द्रौपदी मुर्मू महोदया देशवासिभ्यः शुभाशयान् प्रदत्तवती



भारतस्य राष्ट्रपतिः द्रौपदी मुर्मू महोदया बुद्धपूर्णिमायै पूर्वसन्ध्यायां देशवासिभ्यः हार्दिकान् शुभाशयान् प्रदत्तवती। स्वसन्देशे राष्ट्रपतिमहोदया उक्तवती यत् अयं पावनदिवसः भगवतः बुद्धस्य धरातले आगमनस्य, ज्ञानप्राप्तेः, महापरिनिर्वाणस्य च ऐतिहासिकघटनानां प्रतीकः अस्ति। सा अवदत् यत् भगवतः बुद्धस्य करुणा-अहिंसा-शान्ति-ज्ञानानां शाश्वतसन्देशाः सम्पूर्णमानवतायाः मार्गदर्शनं कुर्वन्तः भविष्यन्ति। राष्ट्रपतिमहोदया कथितवती यत् अनेकासां आव्हानानां सामनां कुर्वत्यां अस्मिन् जगति भगवतः बुद्धस्य शिक्षाः सर्वान् शान्ति-सहिष्णुता-परस्परसद्भावानां मार्गे चलितुं प्रेरयन्ति। सा जनान् भगवतः बुद्धस्य आदर्शान् आत्मसात् कर्तुं तथा च एकस्य शान्तिपूर्णस्य, समावेशिनः, न्यायपूर्णस्य च समाजस्य निर्माणे योगदानं दातुं सङ्कल्पं स्वीकर्तुम् आग्रहं कृतवती।

# गृहमंत्री अमित शाहः भगवतः बुद्धस्य पवित्र-अवशेषाणां प्रदर्शनी-कार्यक्रमे भागं ग्रहीतुं लेह-नगरं प्राप्तवान्

भारतस्य गृहमंत्री अमित शाहः अद्य आरभ्यमाणायां भगवतः बुद्धस्य पवित्र-अवशेषाणां प्रथम-अन्तर्राष्ट्रिय-प्रदर्शिन्यां सम्मिलितुं अद्य लेह-नगरं प्राप्तवान्। लेह-नगरस्य 'कुशोक बकुला रिम्पोची' विमानपत्तने लद्दाखस्य उपराज्यपालेन वी.के. सक्सेना महोदयेन श्री शाहस्य स्वागतं कृतम्। भगवतः बुद्धस्य एषा पवित्र-अवशेषाणां प्रदर्शनी श्वः आरभ्य आगामी-मासस्य चतुर्दश (14) दिनाङ्कपर्यन्तं लद्दाख-क्षेत्रे आयोज्यमाना अस्ति।